॥ वाल्मीकि रामायण॥

४ किष्किन्धाकाण्ड

अध्याय १७

ततः शरेणाभिहतो रामेण रणकर्कशः ।
पपात सहसा वाली निकृत्त इव पादपः ॥ १॥

स भूमौ न्यस्तसर्वाङ्गस्तप्तकाञ्चनभूषणः ।
अपतद्देवराजस्य मुक्तरश्मिरिव ध्वजः ॥ २॥

तस्मिन्निपतिते भूमौ हर्यृषाणां गणेश्वरे ।
नष्टचन्द्रमिव व्योम न व्यराजत भूतलम् ॥ ३॥

भूमौ निपतितस्यापि तस्य देहं महात्मनः ।
न श्रीर्जहाति न प्राणा न तेजो न पराक्रमः ॥ ४॥

शक्रदत्ता वरा माला काञ्चनी रत्नभूषिता ।
दधार हरिमुख्यस्य प्राणांस्तेजः श्रियं च सा ॥ ५॥

स तया मालया वीरो हैमया हरियूथपः ।
सन्ध्यानुगतपर्यन्तः पयोधर इवाभवत् ॥ ६॥

तस्य माला च देहश्च मर्मघाती च यः शरः ।
त्रिधेव रचिता लक्ष्मीः पतितस्यापि शोभते ॥ ७॥

तदस्त्रं तस्य वीरस्य स्वर्गमार्गप्रभावनम् ।
रामबाणासनक्षिप्तमावहत्परमां गतिम् ॥ ८॥

तं तथा पतितं सङ्ख्ये गतार्चिषमिवानलम् ।
ययातिमिव पुण्यान्ते देवलोकात्परिच्युतम् ॥ ९॥

आदित्यमिव कालेन युगान्ते भुवि पातितम् ।
महेन्द्रमिव दुर्धर्षं महेन्द्रमिव दुःसहम् ॥ १०॥

महेन्द्रपुत्रं पतितं वालिनं हेममालिनम् ।
सिंहोरस्कं महाबाहुं दीप्तास्यं हरिलोचनम् ।
लक्ष्मणानुगतो रामो ददर्शोपससर्प च ॥ ११॥

स दृष्ट्वा राघवं वाली लक्ष्मणं च महाबलम् ।
अब्रवीत्प्रश्रितं वाक्यं परुषं धर्मसंहितम् ॥ १२॥

पराङ्मुखवधं कृत्वा को नु प्राप्तस्त्वया गुणः ।
यदहं युद्धसंरब्धस्त्वत्कृते निधनं गतः ॥ १३॥

कुलीनः सत्त्वसम्पन्नस्तेजस्वी चरितव्रतः ।
रामः करुणवेदी च प्रजानां च हिते रतः ॥ १४॥

सानुक्रोशो महोत्साहः समयज्ञो दृढव्रतः ।
इति ते सर्वभूतानि कथयन्ति यशो भुवि ॥ १५॥

तान्गुणान्सम्प्रधार्याहमग्र्यं चाभिजनं तव ।
तारया प्रतिषिद्धः सन्सुग्रीवेण समागतः ॥ १६॥

न मामन्येन संरब्धं प्रमत्तं वेद्धुमर्हसि ।
इति मे बुद्धिरुत्पन्ना बभूवादर्शने तव ॥ १७॥

न त्वां विनिहतात्मानं धर्मध्वजमधार्मिकम् ।
जाने पापसमाचारं तृणैः कूपमिवावृतम् ॥ १८॥

सतां वेषधरं पापं प्रच्छन्नमिव पावकम् ।
नाहं त्वामभिजानानि धर्मच्छद्माभिसंवृतम् ॥ १९॥

विषये वा पुरे वा ते यदा नापकरोम्यहम् ।
न च त्वां प्रतिजानेऽहं कस्मात्त्वं हंस्यकिल्बिषम् ॥ २०॥

फलमूलाशनं नित्यं वानरं वनगोचरम् ।
मामिहाप्रतियुध्यन्तमन्येन च समागतम् ॥ २१॥

त्वं नराधिपतेः पुत्रः प्रतीतः प्रियदर्शनः ।
लिङ्गमप्यस्ति ते राजन्दृश्यते धर्मसंहितम् ॥ २२॥

कः क्षत्रियकुले जातः श्रुतवान्नष्टसंशयः ।
धर्मलिङ्ग प्रतिच्छन्नः क्रूरं कर्म समाचरेत् ॥ २३॥

राम राजकुले जातो धर्मवानिति विश्रुतः ।
अभव्यो भव्यरूपेण किमर्थं परिधावसि ॥ २४॥

साम दानं क्षमा धर्मः सत्यं धृतिपराक्रमौ ।
पार्थिवानां गुणा राजन्दण्डश्चाप्यपकारिषु ॥ २५॥

वयं वनचरा राम मृगा मूलफलाशनाः ।

एषा प्रकृतिरस्माकं पुरुषस्त्वं नरेश्वरः ॥ २६ ॥

भूमिर्हिरण्यं रूप्यं च निग्रहे कारणानि च ।
तत्र कस्ते वने लोभो मदीयेषु फलेषु वा ॥ २७ ॥

नयश्च विनयश्चोभौ निग्रहानुग्रहावपि ।
राजवृत्तिरसङ्कीर्णा न नृपाः कामवृत्तयः ॥ २८ ॥

त्वं तु कामप्रधानश्च कोपनश्चानवस्थितः ।
राजवृत्तैश्च सङ्कीर्णः शरासनपरायणः ॥ २९ ॥

न तेऽस्त्यपचितिर्धर्मे नार्थे बुद्धिरवस्थिता ।
इन्द्रियैः कामवृत्तः सन्कृष्यसे मनुजेश्वर ॥ ३० ॥

हत्वा बाणेन काकुत्स्थ मामिहानपराधिनम् ।
किं वक्ष्यसि सतां मध्ये कर्म कृत्वा जुगुप्सितम् ॥ ३१ ॥

राजहा ब्रह्महा गोघ्नश्चोरः प्राणिवधे रतः ।
नास्तिकः परिवेत्ता च सर्वे निरयगामिनः ॥ ३२ ॥

अधार्यं चर्म मे सङ्ख्ये रोमाण्यस्थि च वर्जितम् ।
अभक्ष्याणि च मांसानि त्वद्विधैर्धर्मचारिभिः ॥ ३३ ॥

पञ्च पञ्चनखा भक्ष्या ब्रह्मक्षत्रेण राघव ।
शल्यकः श्वाविधो गोधा शशः कूर्मश्च पञ्चमः ॥ ३४ ॥

चर्म चास्थि च मे राजन्न स्पृशन्ति मनीषिणः ।
अभक्ष्याणि च मांसानि सोऽहं पञ्चनखो हतः ॥ ३५ ॥

त्वया नाथेन काकुत्स्थ न सनाथा वसुन्धरा ।
प्रमदा शीलसम्पन्ना धूर्तेन पतिता यथा ॥ ३६ ॥

शठो नैकृतिकः क्षुद्रो मिथ्या प्रश्रितमानसः ।
कथं दशरथेन त्वं जातः पापो महात्मना ॥ ३७ ॥

छिन्नचारित्र्यकक्ष्येण सतां धर्मातिवर्तिना ।
त्यक्तधर्माङ्कुशेनाहं निहतो रामहस्तिना ॥ ३८ ॥

दृश्यमानस्तु युध्येथा मया युधि नृपात्मज ।
अद्य वैवस्वतं देवं पश्येस्त्वं निहतो मया ॥ ३९ ॥

त्वयादृश्येन तु रणे निहतोऽहं दुरासदः ।
प्रसुप्तः पन्नगेनेव नरः पानवशं गतः ॥ ४० ॥

सुग्रीवप्रियकामेन यदहं निहतस्त्वया ।
कण्ठे बद्ध्वा प्रदद्यां तेऽनिहतं रावणं रणे ॥ ४१ ॥

न्यस्तां सागरतोये वा पाताले वापि मैथिलीम् ।
जानयेयं तवादेशाच्छ्वेतामश्वतरीम् इव ॥ ४२ ॥

युक्तं यत्प्रप्नुयाद्राज्यं सुग्रीवः स्वर्गते मयि ।
अयुक्तं यदधर्मेण त्वयाहं निहतो रणे ॥ ४३ ॥

काममेवंविधं लोकः कालेन विनियुज्यते ।
क्षमं चेद्भवता प्राप्तमुत्तरं साधु चिन्त्यताम् ॥ ४४ ॥

इत्येवमुक्त्वा परिशुष्कवक्त्रः
शराभिघाताद्व्यथितो महात्मा ।
समीक्ष्य रामं रविसंनिकाशं
तूष्णीं बभूवामरराजसूनुः ॥ ४५ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com